## १२. लक्ष्मी अष्टोत्तर शतनाम स्तोत्रम्

वंदे पद्मकरां प्रसन्नवदनां सौभाग्यदां भाग्यदां
हस्ताभ्याम् अभयप्रदां मणिगणैर्नानाविदैर्भूषिताम् ।
भक्ताभीष्टफलप्रदां हरिहरब्रह्मादिभिस्सेवितां
पार्श्वे पंकजशंखपद्मनिधिभिर्युक्तां सदा शक्तिभिः ॥

सरसिजनिलये सरोजहस्ते धवलतरांशुक गंधमाल्येशोभे ।
भगवति हरिवल्लभे मनोज्ञे त्रिभुवनभूतिकरि प्रसीद मह्यम् ॥

ओम् ॥ प्रकृतिं विकृतिं विद्यां सर्वभूतहितप्रदाम् ।
श्रद्धां विभूतिं सुरभीं नमामि परमात्मिकाम् ॥

वाचं पद्मलयां पद्मां शुचिं स्वाहां स्वधां सुधाम् ।
धन्यां हिरण्मयीं लक्ष्मीं नित्यपुष्टां विभावरीम् ॥

अदितिं च दितिं दीप्तां वसुधां वसुधारिणीम् ।
नमामि कमलां कांतां कामाक्षीं क्षीरसंभवाम् ।

अनुग्रहप्रदां बुद्धिमनघां हरिवल्लभाम् ।
अशोकममृतां दीप्तां लोकशोकविनाशिनीम् ॥
नमामि धर्मनिलयां करुणां लोकमातरम् ।
पद्मप्रियां पद्महस्तां पद्माक्षीं पद्मसुंदरीम् ॥

पद्मोद्भवां पद्ममुखीं पद्मनाभप्रियां रमाम् ।
पद्ममालाधरां देवीं पद्मिनीं पद्मगंधिनीम् ॥

पुण्यगंधां सुप्रसन्नां प्रसादाभिमुखीं प्रभाम् ।
नमामि चंद्रवदनां चंद्रां चंद्रसहोदरीम् ॥

चतुर्भुजां चंद्ररूपामिंदिरामिंदुशीतलाम् ।
आह्लादजननीं पुष्टिं शिवां शिवकरीं सतीम् ॥

विमलां विश्वजननीं तुष्टिं दारिद्र्यनाशिनीम् ।
पीतपुष्करिणीं शांतां शुक्लमाल्यांबरां श्रियम् ॥
भास्करीं बिल्वनिलयां वरारोहां यशस्विनीम् ।

वसुंधरामुदारांगां हरीणीं हेममालिनीम् ॥
धनधान्यकरीं सिद्धिं स्त्रैणसौम्यां शुभप्रदाम् ।
नृपवेश्मगतानंदां वरलक्ष्मीं वसुप्रदाम् ॥

शुभां हिरण्यप्राकारां समुद्रतनयां जयाम् ।
नमामि मंगळां देवीं विष्णुवक्षःस्थलस्थिताम् ॥

विष्णुपत्नीं प्रसन्नाक्षीं नारायणसमाश्रिताम् ।
दारिद्र्यध्वंसिनीं देवीं सर्वोपद्रववारिणीम् ॥

नवदुर्गां महाकाळीं ब्रह्मविष्णुशिवात्मिकाम् ।
त्रिकाल ज्ञानसंपन्नां नमामि भुवनेश्वरीम् ॥

लक्षीं क्षीरसमुद्रराजतनयां श्रीरंगधामेश्वरीं
दासीभूतसमस्तदेववनितां लोकैकदीपांकुराम् ।
श्रीमन्मंदकटाक्षलब्धविधवब्रह्मेंद्रगंगाधरां
त्वां त्रैलोक्यकुटुंबिनीं सरसिजां वंदे मुकुंदप्रियाम् ॥

मातर्नमामि कमले कमलायताक्षि
श्रीविष्णुहृत्कमलवासिनि विश्वमातः ।
क्षीरोदजे कमलकोमलगर्भगौरि
लक्षी प्रसीद सततं नमतां शरण्ये ॥

त्रिकालं यो जपेद्विद्वान् षण्मासं विजितेंद्रियः ।
दारिद्र्यद्वंसनं कृत्वा सर्वमाप्नोति यत्नतः ॥

देवीनामसहस्रेषु पुण्यमष्टोत्तरं शतम् ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥

भृगुवारे शतं धीमान् पठेद्वत्सरमात्रकम् ।
अष्टैश्वर्यमवाप्नोति कुबेर इव भूतले ॥

दारिद्र्यमोचनं नाम स्तोत्रमंबापरं शतम् ।
येन श्रियमवाप्नोति कोटिजन्मदरिद्रतः ॥
भुक्त्वातु विफुलान्भोगान्यासयुज्यमाप्नुयात् ॥

सायंकाले पठेन्नित्यं सर्वदुःखोपशांतये ।
पठंस्तु चिंतयेद्देवीं सर्वाभरणभूषिताम्